इति ख्यातः प्रस्तरभेदः। चुम्बकपाथर इति भाषा।
"उमारूपेण ते यूयं संयमस्तिमितं मनः।
शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लौहवत्"॥
इति कुमारसम्भवे।)
("ततः कोटिसहस्रैर्वा कान्तलौहं महागुणं"।
इति वैद्यकरसेन्द्रसारसङ्ग्रहः॥)

अयस्कारः, पुं, (अयोविकारं करोति, कृ+अण् उपपदसमासः।) प्रजङ्घायाः। जङ्घाग्रभागः। इति त्रिकाण्डशेषः॥ लौहकारः। अयस्करोतीति व्युत्पत्त्या॥

अयाः, [स्] पुं, (इन्+असुन्।) अग्निः। इत्युणादिकोषः॥

अयाचकः, त्रि, (याच+ण्वुल्, ततो नञ्समासः।) याच्ञारहितः। यथा। "यदि भवति स दाता याचकायाचकेषु"। इत्युद्भटः॥ (भिक्षापराङ्मुखः। प्रार्थनाविमुखः।)

अयाचितं, त्रि, (याच्+क्तः, नञ्समासः।) याच्ञां विना लब्धवस्तु। अप्रार्थितं। इत्यमृतशब्दार्थे मेदिनी॥ (अनर्थितं। "अयाचितोपस्थितमम्बु केवलं"। इति कुमारसम्भवे। "अमृतं स्यादयाचितं"। इति मनुः। "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः"। इति स्मृतिः।)

अयाचितः, पुं, (याच्+क्तः, ततो नञ्समासः।) मुनिविशेषः। तत्पर्य्यायः। उपवर्षः २ हलभृतिः ३ कृतकोटिः ४। इति त्रिकाण्डशेषः॥

अयानं, क्ली, स्वभावः। इति हारावली॥ अगमनं। गत्यर्थयाधातोर्भावे ल्युट् ततो नञ्समासः॥

अयि, व्य, प्रश्नः। (इण+इन्।) अनुनयः। सम्बोधनं। इति मेदिनी॥ अनुरागे। ("अयि कठोर! यशः किल ते प्रियं"। इति उत्तरचरिते। "अयि घनोरु! पदानि शनैः शनैः"। इति वेणीसंहारे। "अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः"। इति कुमारसम्भवे।)

अयुक्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) सप्तपर्णवृक्षः। इति हेमचन्द्रः॥

अयुक्तं, त्रि, (युज्+क्तः, नञ्समासः।) अमिश्रितं। अनुचितं। यथा,—
"अयुक्तं यदिह प्रोक्तं प्रमादेन भ्रमेण वा"।
इति दुर्गादासः॥ (असंसक्तः। संयोगरहितः। अनियोजितः। यथा,
"अयुक्तचारा राजानो भविष्यन्ति कथं नु ते"।
इति रामायणे। सर्व्वदा विषयासक्तचित्ततया कर्त्तव्येष्वनवहितः।
"प्रमावमत्तो विषयेषु सक्तवान्,
न देशकालप्रविभागतत्त्ववित्।
अयुक्तबुद्धिर्गुणदोषनिश्चये,
विपन्नराज्यो न चिरात् विपत्स्यसे"॥
इति रामायणे।)

अयुग्मच्छदः, पुं, (अयुग्माः सप्त सप्त छदा अस्य।) विषमच्छदः। सप्तपर्णवृक्षः। इत्यमरटीकायां भरतः॥ (छातिम इति ख्यातः सप्तच्छदवृक्षः।
"अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थाननिकेतनाजिरं।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः"॥
इति किरातार्ज्जुनीये।)

अयुतं, क्ली, (न युतं, नञ्समासः।) दशसहस्रसंख्या। इति हेमचन्द्रः॥ १०००० दशहाजार इति भाषा। ("नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं"। इति रामायणे।)

अयुतः, त्रि, (न युतः, नञ्समासः।) अमिश्रितः। अयुक्तः। यथा। अपृथग्भावोऽयुतासिद्धिः। इति चरकटीका॥ (असंयुक्तः। असंश्लिष्टः। संयोगरहितः। पुंसि स्वनामख्यातः राधिकस्य पुत्रः स च क्रोधनस्य पिता।)

अये, व्य, (इण+एच्।) कोपः। विषादः। सम्भ्रमः। स्मरणं। इति मेदिनी॥ सम्बोधनं। इति शब्दरत्नावली॥ (कोमलामन्त्रणे। "अये कान्ते मुग्धे चटुलनयने चन्द्रवदने"। इत्युद्भटः। "अये कथं तातसारथिरश्वसेनः"। इति वेणीसंहारे।)

अयोगः, पुं, (युज्+घञ्, नञ्समासः।) विश्लेषः। विधुरः। कूटः। कठिनोद्यमः। इति मेदिनी॥ वमनविरेचनादीनां प्रतिलोमप्रवृत्तिरल्पप्रवृत्तिर्व्वा। यथा,—
"योगः सम्यक्प्रवृत्तिः स्यादतियोगोऽतिवर्त्तनं।
अयोगः प्रातिलोम्येन न चाल्पं वा प्रवर्त्तनं"॥
इति वैद्यकं॥ ("तत्रासात्म्येन्द्रियार्थसंयोगोऽयोगातियोगमिथ्यायोगादियुक्ता रूपरसादयः"॥ इति माधवकरकृतरोगविनिश्चयग्रन्थे विजयरक्षितः॥
"त्रीण्यायतनानीति अर्थानां कर्म्मणः कालस्य चातियोगायोगमिथ्यायोगाः तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः॥ सर्व्वशोऽदर्शनमयोगः अतिसूक्ष्मातिश्लिष्टातिविप्रकृष्टरौद्रभैरवाद्भुतद्विष्टबीभत्सविकृतादिरूपदर्शनं। मिथ्यायोगः"॥ इति चरकः॥) योगो ध्यानं तदभावः। योगो भेषजं तदभावश्च॥ (विच्छेदः। मिथः संरूढ़गाढ़ानुरागयोर्नायकनायिकयोर्गुरुजनपराधीनतया दैवगत्या वा विप्रकर्षादन्योन्यादर्शनरूपदशाविशेषः, यदुक्तं दशरूपादर्शे।
"तत्रायोगोऽनुरागेऽपि नवयोरेकचित्तयोः।
पारतन्त्र्येण दैवाद्वा विप्रकर्षादसङ्गमः"॥
अयञ्च पूर्ब्बराग इत्युच्यते। यदुक्तं दर्पणकारैः।
"श्रवणाद्दर्शनाद्वापि मिथः संरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्ब्बरागः स उच्यते"॥)

अयोगवः, त्रि, (अयइव कठिना गौर्व्वाणी यस्य सः, अच्। अयोगं दुष्प्रयोगं वाति वा+कः।) वैश्यकन्यायां शूद्रादुत्पन्नसन्तानः। इति जटाधरः॥ ("शूद्रादयोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः"॥ इति मनुः।
शूद्रात् वैश्यायां जातः प्रतिलोमजः सङ्कीर्णवर्णः।
"प्रसाधनोपचारज्ञमदासं दासजीवनं।
सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे"॥
इति मनुः।)

अयोगुड़ः, पुं, (अयसा निर्म्मितो गुड़ः पिण्डः।) लौहगुलिका। यथा,—
"वरमाशीविषविषं क्वथितं ताम्रमेव वा।
पीतमत्यग्निसन्तप्ता भक्षिता वाप्ययोगुड़ाः"॥
इति चरकः॥

अयोग्रं, क्ली, (अयोऽग्रे मुखे यस्य तत्।) मुषलं। इत्यमरः॥

अयोघनः, पुं, (अयांसि हन्यन्ते ताड्यन्तेऽनेन, हन+अप्+घनादेशश्च।) एकीभूतलौहपुञ्जः। हातुड़ी इति भाषा। तत्पर्य्यायः। लौहकूटं २। इति हेमचन्द्रः॥
("अयोघनेनाय इवाभितप्तं
वैदेहिबन्धोर्हृदयं विदद्रे"।
इति रघुवंशे।
"कुरु करे गुरुमेकमयोघनं
वहिरितो मुकुरश्च कुरुष्व मे"।
इति नैषधं।)

अयोध्या, स्त्री, (योद्धुमशक्या, युध+ण्यत्, नञ्समासः।) श्रीरामनगरी। पश्चिमदेशे अयोद इति प्रसिद्धा। तत्पर्य्यायः। साकेतं २ कोशला ३। इति हेमचन्द्रः॥ उत्तरकोशला ४। इति त्रिकाण्डशेषः॥ सा तु मोक्षदा पुरी। यथा,—
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः॥
एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन।
श्रीरामधनुरग्रस्था अयोध्या सा महापुरी"॥
इति भूतशुद्धितन्त्रं॥ *॥ तद्वर्णनं यथा,—
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥
अयोध्या नाम नगरी तत्रासील्लोकविश्रुता।
मनुना मानवेन्द्रेण या पुरी निर्म्मिता स्वयम्॥
आयता दश च द्वे च योजनानि महापुरी।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा॥
राजमार्गेण महता सुविभक्तेन शोभिता।
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः॥
तान्तु राजा दशरथो महाराष्ट्रविवर्द्धनः।
पुरीमावासयामास दिवि देवपतिर्यथा॥
कपाटतोरणवतीं सुविभक्तान्तरापणां।
सर्व्वयन्त्रायुधवतीमुषितां सर्व्वशिल्पिभिः॥
सूतमागधसम्बाधां श्रीमतीमतुलप्रभां।
उच्चाट्टालध्वजवतीं शतघ्नीशतसंकुलां॥
बधूनाटकसंघैश्च संयुक्तां सर्व्वतः पुरीं।
उद्यानाम्रवणोपेतां महतीं शालमेखलां॥
दुर्गगम्भीरपरिखां दुर्गामन्यैर्दुरासदां।
वाजिवारणसम्पूर्णां गोभिरुष्ट्रैः खरैस्तथा॥
सामन्तराजसङ्घैश्च बलिकर्म्मभिरावृतां।
नानादेशनिवासैश्च वणिग्भिरुपशोभितां॥
प्रासादैः रत्नविकृतैः पर्व्वतैरिव शोभितां।
कूटागारैश्च सम्पूर्णामिन्द्रस्येवामरावतीं॥